श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

हरिवंशे भविष्यपर्वणि

# ॥ श्री मोक्षविंशक स्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री मोक्षविंशक स्तोत्रम् ॥

ओं नमोऽस्त्वनन्तपतये अक्षयाय महात्मने।
जलेशयाय देवाय पद्मनाभाय विष्णवे ॥ 1 ॥

सप्तसूर्यवपुः कृत्वा त्रीन् लोकान् क्रान्तवानसि।
भगवन् कालकालस्त्वं तेन सत्येन मोक्षय ॥ 2 ॥

नष्टचन्द्रार्कगगने क्षीणयज्ञतपःक्रिये।
पुनश्चिन्तयसे लोकांस्तेन सत्येन मोक्षय ॥ 3 ॥

ब्रह्मरुद्रेन्द्रवाय्वग्निसरिद्द्रुजगपर्वताः।
त्वत्स्था दृष्टा द्विजेन्द्रेण तेन सत्येन मोक्षय ॥ 4 ॥

मार्कण्डेन पुरा कल्पे प्रविश्य जठरं तव।
चराचरगतं दृष्टं तेन सत्येन मोक्षय ॥ 5 ॥

एको विद्यासहायस्त्वं योगी योगमुपागतः।
पुनस्त्रैलोक्यमुत्सृज्य तेन सत्येन मोक्षय ॥ 6 ॥

जलशय्यामुपासीनो योगनिद्रामुपागतः।
लोकांश्चिन्तयसे भूयस्तेन सत्येन मोक्षय ॥ 7 ॥

वाराहं रूपमास्थाय वेदयज्ञपुरस्कृतम्।
धरा जलोद्धृता येन तेन सत्येन मोक्षय ॥ 8 ॥

उद्धृत्य दंष्ट्रया यज्ञांस्त्रीन् पिण्डान् कृतवानसि।
त्वं पितृणामपि हरे तेन सत्येन मोक्षय ॥ 9 ॥

प्रदुद्रुवुः सुराः सर्वे हिरण्याक्षभयार्दिताः।
परित्रातास्त्वया देव तेन सत्येन मोक्षय॥ 10 ॥

दीर्घवक्त्रेण रूपेण हिरण्याक्षस्य संयुगे।
शिरो जहार चक्रेण तेन सत्येन मोक्षय॥ 11 ॥

भग्नमूर्धास्थिमस्तिष्को हिरण्यकशिपुः पुरा।
हुङ्कारेण हतो दैत्यस्तेन सत्येन मोक्षय॥ 12 ॥

दानवाभ्यां हृता वेदा ब्रह्मणः पश्यतः पुरा।
परित्रातास्त्वया देव तेन सत्येन मोक्षय॥ 13 ॥

कृत्वा हयशिरोरूपं हत्वा तु मधुकैटभौ।
ब्रह्मणे तेऽर्पिता वेदास्तेन सत्येन मोक्षय॥ 14 ॥

देवदानवगन्धर्वा यक्षसिद्धमहोरगाः।
अन्तं तव न पश्यन्ति तेन सत्येन मोक्षय॥ 15 ॥

अपान्तरतमा नाम जातो देवस्य वै सुतः।
कृताश्च तेन वेदार्थास्तेन सत्येन मोक्षय॥ 16 ॥

वेदयज्ञाग्निहोत्राणि पितृयज्ञहवींषि च।
रहस्यं तव देवस्य तेन सत्येन मोक्षय॥ 17 ॥

ऋषिर्दीर्घतमा नाम जात्यन्धो गुरुशापतः।
त्वत्प्रसादाच्च चक्षुष्मांस्तेन सत्येन मोक्षय॥ 18 ॥

ग्राहग्रस्तं गजेन्द्रं च दीनं मृत्युवशं गतम्।
भक्तं मोक्षितवांस्त्वं हि तेन सत्येन मोक्षय॥ 19 ॥

अक्षयश्चाव्ययश्च त्वं ब्रह्मण्यो भक्तवत्सलः।
उच्छ्रितानां नियन्तासि तेन सत्येन मोक्षय॥ 20 ॥

शङ्खं चक्रं गदां पद्मं शार्ङ्गं गरुडमेव च।
प्रसादयामि शिरसा ते बन्धान्मोक्षयन्तु माम्॥ **21** ॥

वैशम्पायन उवाच
इमं स्तवमनन्तस्य सर्वपापप्रमोचनम्।
यः पठेत नरो भक्त्या तस्य नश्यति किल्बिषम्॥ **22** ॥

गोहत्यायाः प्रमुच्येत ब्रह्मघ्नो ब्रह्महत्यया।
अपुत्रो लभते पुत्रं कन्या चैवेप्सितं पतिम्॥ **23** ॥

सद्यो गर्भात् प्रमुच्येत गर्भिणी जनयेत् सुतम्।
ये च मोक्षैषिणो लोके योगिनः साङ्ख्यकापिलाः॥ **24** ॥

स्तवेनानेन गच्छन्ति श्वेतद्वीपमकल्मषाः।
सर्वकामप्रदो ह्येष स्तवोऽनन्तस्य कीर्त्यते॥ **25** ॥

यः पठेत् प्रातरुत्थाय शुचिः प्रयतमानसः।
सर्वान् कामानवाप्नोति मानवो नात्र संशयः॥ **26** ॥

॥ इति श्री मोक्षविंशक स्तोत्रम् समाप्तम्॥